निख्

# संस्कृतदीपम्

२०११ - २०१२

दशमीकक्ष्यायाः
छात्राणां कृते

तेषां अक्कादमिक मूल्यसंवर्धनाय
संपूर्णविजयाय
सज्जीकृता प्रश्नोत्तरपत्रिका

कक्ष्या - दशमी

जिल्लातदेशस्दयंभरणकार्यालयम्
आलप्पुषा

# विषयानुक्रमणिका


| पाठस्य नाम | प्रश्नरूपाणि |
|---|---|
| १. अभित्तौ चित्रकर्म | १. कोष्ठकान्निर्धारणम् |
| २. वृक्षरोपणविधयः | २. पदच्छेदः |
| ३. गीतामृतम् | ३. विग्रहवाक्यानि |
| ४. आयुर्दानं महादानम् | ४. संभाषणरचना |
| ५. सुयोधनस्य राजनीतिः | ५. यथोचितं संयोजनम् |
| ६. यागाश्वबन्धनम् | ६. टिप्पणिलेखनम् |
| ७. केरलीयकलारूपाणि | ७. जीवचरित्ररचना |
| ८. सुरायाः असुरता | ८. गद्यक्रमरचना |
| ९. दिशानिर्णयः | ९. आशयलेखनम् |
| १०. योगिनः सर्वसेवकाः | १०. भाषान्तरीकरणम् |
| ११. दीक्षान्तोपदेशः | ११. उत्तरलेखनम् |
| | १२. वाक्यप्रयोगम् |

# एककम् १ - २

## ।। उद्योगः कार्यसाधकः ।।

## ।। कृषिः मानवजीवातुः ।।

### १) अभित्तौ चित्रकर्म, २) वृक्षरोपणविधयः

I. उचितं उत्तरं कोष्टकान्निर्धार्य लिखत -

(क) कथासरित्सागरः केन विरचितः?

(कालिदासेन, माघेन, सोमदेवेन)

(ख) ग्रीष्मकाले वृक्षाः कदा सेक्तव्याः?

(प्रातः, दिनान्ते, सायं प्रातः च)

(ग) वृक्षरोपणपालनविधयः कस्मिन् ग्रन्थे प्रतिपादितम्?

(तत्त्वसंहिता, अष्टाङ्गहृदयं, बृहत्संहिता)

II. प्रधानकर्म चित्वा लिखत -

मूषिकं सोपहासं तस्मै अदात्।

III. एकं पदं लिखत

अ. ज्ञातुं इच्छा

आ. गर्वेण सह वर्तते

इ. रोषेण सह वर्तते

ई. आमोदेन सह वर्तते

उ. आनन्देन सह वर्तते

IV. यथोचितं योजयत

| | | |
|---|---|---|
| अ. मूषिकवर्तकः | - | बृहत्संहिता |
| आ. नगरात् बहिः | - | वृक्षस्य रोगः |
| इ. वृक्षायुर्वेदः | - | पञ्चमी |
| ई. पाण्डुपत्रता | - | सोमदत्तः |

V. निर्दिष्टसूचनामनुसृत्य वृक्षरोपणपालनविधिं अधिकृत्य टिप्पणिं लिखत ।

सूचनाः सस्यक्षेत्रसज्जीकरणं, मृदुमृत्तिकातिलानि, पूजां कृत्वा बालवृक्षरोपणम्।

VI. गद्यांशं पठित्वा अधोदत्तानां प्रश्नानामुत्तराणि लिखत ।

वाराणसी नामके जनपदे वसिष्ठको नाम कश्चन कृषकः आसीत्। सः पत्न्या पुत्रेण च साकं वसति स्म। तस्य पिता जराबाधितः निरुद्धस्वच्छन्दगतिः तत्रैवावसन्। वसिष्ठकस्य पत्नी स्वभावेन दुष्टा परोपकारविमुखा च आसीत्। सा सदा श्वशुरं परुषवचनैः निनिन्द।

अ. वसिष्ठकः कः?

आ. वसिष्ठकस्य पत्नी कीदृशी?

इ. 'भर्तुः पिता' इत्यर्थकं पदं किं?

ई. खण्डिकायाः उचितं शीर्षकं लिखत।

VII. मातृभाषायां विवर्तयत।

ब्राह्मणकुमाराणां उपनयनम् अष्टमे वयसि एव कुर्यात् इत्यासीत् व्यवस्था। तथापि माता बालकं कुशलधिषणं तृतीये वयसि उपनीय गुरुसमीपं प्रैषयत्। सः अचिरेणैव सर्वानपि शास्त्रार्थान् स्वायत्तीकृतवान्। एकदा बालकः भृत्येनैकेन समं समीपस्थं मन्दिरं गतवान्। देवीदर्शनानन्तरमागतं तं कश्चन एवमपृच्छत्।।

VIII. परस्मैपदात्मनेपदरूपाणि विविच्य पट्टिकां आरचयतु।

प्रार्थयत, अभवत्, पलायत, अश्रूयत, अब्रवीत्, अदर्शयत्, अवदत्, अवर्धत

IX. प्रदत्तपदानां समानाशययुक्तं पदं कोष्ठात् निर्धार्य लिखत।

| | | |
|---|---|---|
| क. | जीवातुः | किसलयः |
| ख. | प्रवालः | जीवनौषधम् |
| ग. | क्षेत्रम् | सन्निवेशितः |
| घ. | संश्लेषितः | कृषिभूमिः |

# उत्तरसूचिका

I. क. सोमदेवेन

ख. सायं प्रातः च

ग. बृहत्संहिता

II. मूषिकं

III. अ. जिज्ञासा

आ. सगर्वम्

इ. सरोषम्

ई. सामोदम्

उ. सानन्दम्

IV. अ. मूषिकवर्तकः - सोमदत्तः

आ. नगरात् बहिः - पञ्चमी

इ. वृक्षायुर्वेदः - बृहत्संहिता

ई. पाण्डुपत्रता - वृक्षस्य रोगः

V. वृक्षरोपणाय प्रथमतः सस्यक्षेत्रं सज्जीकरणीयम्। तच्च क्षेत्रं मृदुमृत्तिकायुक्तं भवेत्। प्रथमं तत्र तिलानि वप्तव्यानि। यदा तानि पुष्पयन्ति तदा उपमृद्य मृत्तिकया सह योजयेत्। एवं पुष्टीकृते क्षेत्रे बालवृक्षरोपणं कर्तव्यम्। शुचिः भूत्वा वृक्षस्य स्नानानुलेपनैः पूजां कृत्वा रोपयेत्। अनेन प्रकारेण रोपितः बालवृक्षः तैरेव पत्रैः सह वर्धते न शुष्यति।

VI. अ. वसिष्ठकः कश्चन कृषकः आसीत्।

आ. वसिष्ठकस्य पत्नी स्वभावेन दुष्टा परोपकारविमुखा च ।

इ. श्वशुरः।

ई. वसिष्ठकः परिवारः च।

VII. ബ്രാഹ്മണകുമാരന്മാരുടെ ഉപനയനം എട്ടാമത്തെ വയസ്സിൽ തന്നെ നടത്തണം എന്ന് വ്യവസ്ഥ ഉണ്ടായിരുന്നു എന്നിരുന്നാലും അമ്മ ബാലനെ അതി

ബുദ്ധിമാൻ എന്ന നിലയിൽ മൂന്നാമത്തെ വയസ്സിൽ ഉപനയനം നടത്തി ഗുരുസമീപത്തേയ്ക്ക് അയച്ചു. അവൻ താമസിയാതെതന്നെ എല്ലാ ശാസ്ത്രാർത്ഥങ്ങളേയും സ്വായത്തമാക്കി. ഒരിക്കൽ ബാലൻ (കുട്ടി) ഒരു ഭൃത്യനോടൊപ്പം അടുത്തുള്ള ദേവീക്ഷേത്രത്തിൽ പോയി. ദേവീദർശനത്തിനുശേഷം വന്ന അവരോടൊരുവൻ ഇങ്ങനെ ചോദിച്ചു.

| VIII. | परस्मैपदरूपाणि | आत्मनेपदरूपाणि |
|---|---|---|
| | अभवत् | प्रार्थयत |
| | अब्रवीत् | पलायत |
| | अदर्शयत् | अश्रूयत |
| | अवदत् | अवर्धत |

IX क. जीवातुः - जीवनौषधम्

ख. प्रवालः - किसलयः

ग. क्षेत्रम् - कृषिभूमिः

घ. संश्लेषितः - सन्निवेशितः

# एककम् ३
# ।। मानवधर्मः ।।
## ३ गीतामृतम्

**प्रवर्तनम् १**

क. श्रीमद्भगवद्गीता कस्मात् ग्रन्थादुद्धृता?

**प्रवर्तनम् २** - ऐकैकेन वाक्येन प्रश्नानां उत्तराणि लिखत।

क. "त्रिविधा भवति श्रद्धा"। ताः काः?

ख. आहाराः कतिविधाः? ते के?

ग. सात्विकाहारः कीदृशः भवति?

घ. राजसाहारस्य सामान्यस्वरूपं किं?

ङ. तामसाहारः कीदृशः भवति?

च. किं नाम शारीरं तपः?

छ. वाङ्मयं तपः कीदृशः भवति?

ज. मानसं तपः कीदृशः भवति?

**प्रवर्तनम् ३** - यथोचितं योजयत।

क. सात्विकाः - यक्षरक्षांसि

ख. राजसाः - प्रेतान् भूतगणान्

ग. तामसाः - देवाः

**प्रवर्तनम् ४** - सन्धत्त।

क. सात्विकाः देवान् -

ख. सः एव -

ग. तामसाः जनाः -

घ. भूतगणान् च अन्ये -

**प्रवर्तनम् ५** विग्रहवाक्यं लिखत।

त्रिविधा

श्रद्धामयः

अमेध्यम्

वाङ्मयम्

**प्रवर्तनम् ४** गद्यक्रमं लिखत।

क. यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः।

प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः।। श्लोकं (३)

**प्रवर्तनम् ५** षड्रसाः के? षड् भोज्यवस्तूनां नामानि च लिखत।

**प्रवर्तनम् ६** भोज्यवस्तूनां नामानि रसमनुसृत्य पट्टिकां कुरुत।

कदलीफलम्, मरीचिका, धात्री, क्षीरम्, सेवा, घृतं, शुण्ठी, सैन्धवम्, लवणम्, कारवेलम्, तक्रम्।

**प्रवर्तनम् ७** श्रद्धात्रयं अधिकृत्य लघूपन्यासं लिखत।

## उत्तरसूचिका

**प्रवर्तनम् १** क. महाभारतात्।

**प्रवर्तनम् २** - क. सात्विकी, राजसी, तामसी चेति....।

ख. त्रिविधाः। सात्विकः, राजसः, तामसः।

ग. आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः, स्निग्धाः, स्थिराः, हृद्याः आहाराः सात्विकाः भवन्ति।

घ. कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः दुःखशोकामयप्रदाः आहाराः राजसाः भवन्ति।

ङ. यातयामं गतरसं पूति पर्युषितम् उच्छिष्टम् अपि अमेध्यं च यत् भोजनं तत् तामसं भवति।

च. देवद्विजगुरुप्राज्ञपूजनम्, शौचम्, आर्जवम्, ब्रह्मचर्यम्, अहिंसा च शारीरम् तपः उच्यते।

छ. यद् वाक्यम् अनुद्वेगकरं सत्यं प्रियहितं स्वाध्यायाभ्यसनं च तत् एव वाङ्मयं तपः।

ज. मनःप्रसादः, सौम्यत्वं, मौनम्, आत्मविनिग्रहः, भावसंशुद्धिः इत्येतत् मानसं तपः उच्यते।

**प्रवर्तनम् ३** - यथोचितं योजयत।

क. सात्विकाः - देवाः

ख. राजसाः - यक्षरक्षांसि

ग. तामसाः - प्रेतान् भूतगणान्

**प्रवर्तनम् ४** - सन्धत्त।

क. सात्विका देवान्

ख. स एव

ग. तामसा जनाः

घ. भूतगणांश्चान्ये

**प्रवर्तनम् ५** विग्रहवाक्यं लिखत।

क. तिस्रः विधाः यस्याः सा।

ख. श्रद्धायाः विकारः ।

ग. मोधितुं योग्यं मेध्यं, न मेध्यं अमेध्यम्।

घ. वाचो विकारः ।

**प्रवर्तनम् ४** गद्यक्रमं लिखत।

क. सात्विकाः (जनाः) देवान् यजन्ते। राजसाः यक्षरक्षांसि, अन्ये तामसाः प्रेतान् भूतगणान् च यजन्ते।

**प्रवर्तनम् ५** मधुरः, अम्लः, लवणः, कटुः, तिक्तः, कषायः च षड्रसाः।

कदलीफलम्, धात्री, सैन्धवम्, मरीचिका, कारवेलम्, कषायः।

**प्रवर्तनम् ६**

| | | | | |
|---|---|---|---|---|
| मधुरः | अम्लः | लवणः | कटुः | तिक्तः |
| कदलीपलम् | धात्री | सैन्धवम् | मरीचिका | कारवेलम् |
| सेवा | तक्रम् | लवणम् | शुण्ठी | |
| क्षीरम् | | | | |
| घृतं | | | | |

**प्रवर्तनम् ७** श्रद्धा नाम विश्वासः, अदृष्टार्थेषु विश्वासः। सा श्रद्धा सात्त्विकी, राजसी, तामसी चेति त्रिप्रकारा भवति। सत्त्वं, रजः, तमः इति त्रयो गुणाः। त्रिगुणात्मिकायाः प्रकृतेः कार्यभूताः सर्वे प्राणिनः त्रिगुणात्मकाः। तेषां श्रद्धा

गुणानाश्रित्य त्रिविधा भवति। मनुष्याणां स्वभावः सात्त्विकः, राजसः, तामसः चेति त्रिधा दृश्यते।

सर्वेषां श्रद्धा स्वसंस्कारमनुसृत्यैव प्रवर्तते। अयं मनुष्यः श्रद्धायुक्तः यः यया श्रद्धया जीवति सः तच्छ्रद्धः एव भविष्यति। यस्य श्रद्धा यादृशी भवति सः तादृशश्रद्धायुक्तः एव।

सत्वगुणयुक्ताः सात्त्विकाः देवान् पूजयन्ति। रजोगुणयुक्ताः राजसाः यक्षरक्षांसि भजन्ते। अन्ये तमोगुणयुक्ताः तामसाः भूतप्रेतपिशाचादीन् च सेवन्ते।

## एककम् ४

## ।।भारतीयचिकित्सापद्धतिः।।

### आयुर्दानं महादानम्

1. अ. आयुर्वेदस्य लक्षणं किं?

   आ. शरीरजाः त्रयः दोषाः के?

   इ. आलोपतिचिकित्सायां 'जनरल् मेडिसिन्' इति श्रुतं आयुर्वेदे कस्मिन् चिकित्सा विभागे अन्तर्भवति?

**टिप्पणिलेखनम्**

2. आयुर्वेदस्य अष्टाङ्गानि विशदयत।

3. यथोचितं योजयत।

| | | |
|---|---|---|
| अ. | वाग्भटः - | योगसूत्रम् (अष्टाङ्गयोगम्) |
| आ. | चरकः - | अष्टाङ्गसंग्रहः, अष्टाङ्गहृदयः |
| इ. | सुश्रुतः - | चरकसंहिता |
| ई. | पतञ्जलिः- | सुश्रुतसंहिता |

4. समस्तपदं लिखत।

विग्रहवाक्यम्

अ. आयुषः वेदः

आ. स्वस्मिन् तिष्ठति

इ. अन्यत् नाम

ई. अन्यत् लोकम्

उ. अन्यत् जन्मम्

5.

अ. मातृकानुसारं सन्धिच्छेदं कुरुत।

रसायनविद्येति - रसायनविद्या इति

एवं चेत् भूतविद्येति -

आ. उपकरोत्ययम् - उपकरोति अयम्

एवं चेत्

भवत्यरोगः। -

इ. प्रसिद्धेऽस्मिन् - प्रसिद्धे अस्मिन्

एवं चेत्

विभागेऽस्मिन् -

6. आयुर्वेदस्य अष्टाङ्गानि कानि?

7. आयुर्वेदाचार्येण सह भवता कृतं संभाषणं यथायथं संभाव्य लिखतु।

रमा - नमस्ते।

आचार्यः - नमस्ते। आगच्छतु, उपविशतु। ..................?

रमा - अहं आयुर्वेदमधिकृत्य केचन सन्देहान् निवारयितुं आगता।

आचार्यः - समीचीनम्। पृच्छतु।

रमा - ............................?

आचार्यः - अष्टाङ्गहृदयं, चरकसंहिता, सुश्रुतसंहिता।

रमा - आयुर्वेदस्य अष्टाङ्गानि कानि?

आचार्यः - ......................।

रमाः - ........................?

आचार्यः - नेत्रश्रोत्रनासाद्यवयवसम्बन्धिनः चिकित्साविधयः भवति ऊर्ध्वाङ्गचिकित्सा।

रमा - आयुर्वेदे शस्त्रक्रिया अस्ति वा?

आचार्यः - ...............। चरकाचार्यस्य शल्यचिकित्सा सम्प्रदायः एव तत्

रमा - धन्यवादः। ........................।

8. अधोरेखाङ्कितानि पदानि विश्लेषयत।

अ. रसायनविद्येति अस्यापरं नाम।

आ. वाजीकरणतन्त्रमिति प्रसिद्धेऽस्मिन् विभागे यौवनसंरक्षणोपायाः सुष्ठु प्रतिपादिताः।

इ. रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ।

## उत्तरसूचिका

1. अ. हिताहितं सुखं दुःखम् आयुस्तस्य हिताहितम्।
मानं च तच्च यत्रोक्तम् आयुर्वेदः स उच्यते।।

आ. वातपित्तकफाश्चेति त्रयः शरीरजाः दोषाः।

इ. कायचिकित्साविभागे।

2. आयुषः वेदः आयुर्वेदः। भारतीयचिकित्साशास्त्रस्य आयुर्वेद इति नाम। तत्र आयुषः पालनाय एवं संवर्धनाय च उपायाः उक्ताः। अस्मिन् शास्त्रे चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयं च इति अतिप्रसिद्धाः ग्रन्थाः उपलभ्यन्ते। कायः, बालः, ग्रहः, ऊर्ध्वाङ्गः , शल्यं, दंष्ट्रा, जरा, वृषः इति आयुर्वेदस्य अष्टाङ्गानि आहुः।

तत्र कायचिकित्सायां जठराग्निवर्धकाः उपायाः प्रतिपादिताः सन्ति। आधुनिकैः अयं विभागः 'जनरल् मेडिसिन्' इति कथ्यते। बालचिकित्सायां मातुः एवं शैशवादारभ्य कौमारावस्थायधिकानां बालानां चिकित्सा प्रतिपादिता। ग्रहचिकित्साविभागे मानसिकारोग्यपालनोपायाः उक्ताः। दंष्ट्राचिकित्साविभागे विषद्रव्याणां विषप्रतिरोधोपायाः प्रतिपादिताः। रसायनचिकित्सायां वयःस्थापनमायुर्मेधाबलकराः रोगापनयनविषयः च प्रतिपाद्यन्ते। वाजीकरणतन्त्रे मनुष्याणां ओजोवर्धकाः चिकित्साविधयः च प्रतिपाद्यन्ते। एवं अष्टाङ्गेषु उक्तानां विषयाणां सम्यक् ज्ञानेन चिकित्सकः चिकित्सेत् चेत् सर्वेषाम् आरोग्यपालने सः निपुणः भविष्यति।

3 अ. वाग्भटः - अष्टाङ्गसंग्रहः, अष्टाङ्गहृदयः

आ. चरकः - चरकसंहिता

इ. सुश्रुतः - सुश्रुतसंहिता

ई. पतञ्जलिः- योगसूत्रम् (अष्टाङ्गयोगम्)

4 अ. आयुर्वेदः।

आ. स्वस्थः।

इ. नामान्तरम्।

ई. लोकान्तरम्।

उ. जन्मान्तरम्।

5 अ. भूतविद्या इति

आ. भवति अरोगः

इ. विभागे अस्मिन्

6. कायः, बालः, ग्रहः, ऊर्ध्वाङ्गः , शल्यं, दंष्ट्रा, जरा, वृषः इति आयुर्वेदस्य अष्टाङ्गानि आहुः।

7. रमा - नमस्ते।

आचार्यः - नमस्ते। आगच्छतु, उपविशतु। भवति किमर्थं आगता?

रमा - अहं आयुर्वेदमधिकृत्य केचन सन्देहान् निवारयितुं आगता।

आचार्यः - समीचीनम्। पृच्छतु।

रमा - प्रमुखाः आयुर्वेदग्रन्थाः के?

2. किरातार्जुनीयमहाकाव्यस्य कर्ता कः?

(कालिदासः, भारविः, भवभूतिः)

**प्रश्ननिर्देशः - २**

अधोदत्तयोः पदच्छेदं लिखत।

१. नृपासनस्थोऽपि

२. विशेषोऽपि

३. सुहृदश्च

४. स सन्ततम्

५. कुरवश्चकासति।

६. शिरोभिरुह्यते।

**प्रश्ननिर्देशः - ३**

श्लोकं पठित्वा अधोदत्तानां प्रश्नानां उत्तराणि लिखत।

I. विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

1. पराजयं इत्यर्थे श्लोके प्रयुक्तं पदं किम्?
2. कः समीहते?
3. कां जेतुं समीहते?
4. 'ज्ञातुम्' एतादृशमन्यत् अव्ययपदं श्लोकाद् चित्वा लिखत।

II. वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम्।।

1. सुयोधनः किं वाञ्छत्र?

2. 'संयमी' इत्यर्थे श्लोके प्रयुक्तं पदं किम्?

3. किं निहन्ति?

4. अस्मिन् श्लोके क्रियापदं किम्?

**प्रश्ननिर्देशः ४**

दुर्जनसंसर्गापेक्षया सज्जनशत्रुता प्रशस्यतरा इत्याशयप्रतिपादकं श्लोकं विवेचयत।

i. तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसंगमा-
द्वरं विरोधोऽपि समं महात्मभिः।।

ii. विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः।।

**प्रश्ननिर्देशः - ५**

सुयोधनस्य शासनं अधिकृत्य सूचनानुसारं टिप्पणीं लिखत।

सूचनाः कुटिलमतिः सुयोधनः।
दुर्जनसंसर्गापेक्षया प्रियम्।
पुरुषार्थं नयेन विस्तार्यते।
शासने समदर्शनम्।
सुखेन जीवनम्।

**प्रश्ननिर्देशः - ६**

श्लोकस्य गद्यक्रमं लिखत।

कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम्।।

**प्रश्ननिर्देशः - ७ - श्लोकस्य आशयं लिखत।**

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्यमाननम्।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम्।।

## उत्तरसूचिका

**प्रश्ननिर्देशः- १**

1. अर्थगौरवम्।
2. भारविः।

**प्रश्ननिर्देशः - २**

१. नृपासनस्थः अपि।
२. विशेषः अपि।
३. सुहृदः च।
४. सः सन्ततम्।
५. कुरवः चकासति।
६. शिरोभिः उह्यते।

**प्रश्ननिर्देशः - ३**

I. 1. पराभवम्।

2. सुयोधनः।

3. जगतीम्।

4. जेतुं।

II. 1. वसूनि।

2. वशी।

3. धर्मविप्लवम्।

4. निहन्ति।

**प्रश्ननिर्देशः ४**

i. तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः।
समुन्नयन्भूतिमनार्यसंगमा-
द्वरं विरोधोऽपि समं महात्मभिः।।

**प्रश्ननिर्देशः - ५**

सुयोधनः कपटद्युतेन जितां भूमिं नीत्या वशीकर्तुं प्रयतते। सज्जनैः सह द्वेषः अपि दुर्जनसंसर्गापेक्षया ईषत्प्रियं भवति। अतः सः युधिष्ठिरं जेतुमिच्छया दयादाक्षिण्यादिगुणसम्पदा ऐश्वर्य वर्धयन् स्वच्छं यशः तनोति। दुर्योधनः निरहङ्कारो भूत्वा भृत्येषु, सुहृत्सु, बन्धुषु च सखीबान्धवसचिवाद्यधिकारिदृष्टिं कृत्वा आदरं प्रकटयति। सः ममतां विना समानानुरागेण स्वकीयान् धर्मार्थकामान् सेवते। दुर्योधनस्य गुणानुरक्ताः धर्मार्थकामाः त्रयोऽपि मैत्रीं प्राप्तवन्तः इव वर्तन्ते। जितेन्द्रियः सः धनलिप्सां क्रोधं च विना गुरूपदिष्टेन दण्डोपायेन रिपुं वा पुत्रं वा समं दण्डयति। यदा सः प्रजाक्षेमं वितन्वन् आस्ते तदा सर्वे कुरुदेशवासिनः अयत्नसुलभैः सस्यविभवैः सुखेन जीवन्ति। तस्य गुणेषु अनुरागात् आकृष्टाः नृपाः तस्य आज्ञां मालामिव शिरोभिः धारयन्ति। यतः सः कुत्रापि कदापि युद्धाय धनुः न उद्धृतवान्, एवम् आननं कोपेन न वक्रीकृतम्।

**प्रश्ननिर्देशः - ६**

कृतारिषड्वर्गजयेन अगम्यरूपां मानवीं पदवीं प्रपित्सुना अस्ततन्त्रिणा तेन नक्तंदिवं विभज्य नयेन पौरुषं वितन्यते।

**प्रश्ननिर्देशः - ७ -**

सः दुर्योधनः कुत्रापि कदापि युद्धाय धनुः न उद्धृतवान्। तथा च तेन आननं कोपेन न वक्रीकृतम्। तथापि तस्य गुणेषु अनुरागात् आकृष्टाः नृपाः तस्य आज्ञां मालामिव शिरोभिः धारयन्ति।

## ।। ५. यागाश्वबन्धनम् ।।

**प्रवर्तनम् १ उचितं उत्तरं कोष्ठकान्निर्धार्य लिखत।**

अ. ........ रसप्रधानं भवति उत्तररामचरितम्।

(करुणम्, हास्यम्, शान्तम्)

आ. उत्तरे रामचरिते कः विशिष्यते?

(भवभूतिः, भासः, कालिदासः)

**प्रवर्तनम् २ यथोचितं योजयत।**

| | | |
|---|---|---|
| कालिदासः | - | प्रतिमानाटकम् |
| भवभूतिः | - | शाकुन्तलम् |
| भासः | - | उत्तररामचरितम्। |

**प्रवर्तनम् ३**

(क) आश्वमेधिकोऽयमश्वः इति लवः कथं समर्थयति?

(ख) तां पताकां हरामि वः। अत्र पताकाशब्देन कः विवक्षितः?

**प्रवर्तनम् - ४**

यागाश्वबन्धनम् इति पाठभागं पुरस्कृत्य लवस्य स्वभावविशेषान् प्रतिपादयतु-

सूचना - सुकुमारः - विनयान्वितः - गुरुजनेष्वादरः - सुहृद्स्नेहः - अधीतस्य प्रत्यभिज्ञानं - क्षात्रं तेजः - वाग्विलासः।

## उत्तरसूचिका

**प्रवर्तनम् - १**

अ. करुणम्।

आ. भवभूतिः।

**प्रवर्तनम् - २**

कालिदासः - शाकुन्तलम्।

भवभूतिः - उत्तररामचरितम्।

भासः - प्रतिमानाटकम्।

**प्रवर्तनम् - ३**

क. 'प्रत्येकं शतसंख्याः कवचिनः दण्डिनः निषङ्गिणः च रक्षितारः। तत्प्रायमेव अन्यदपि दृश्यते।' इति वचनेन आश्वमेधिकोऽयमश्वः इति लवः समर्थयति।

ख. अश्वः

**प्रवर्तनम् - ४**

सुकुमारे विनयान्विते द्वादशवर्षीये बाले, जनकमहाराजः सीतायाः रामस्य च आकृतिं वाग्विलासं च पश्यति। अधीताः विषयाः ग्रहणमननाभ्यां दृढीकृताः अपि ज्ञापयति तेन कृतं आश्वमेधिकाश्वप्रत्यभिज्ञानम्। अदृष्टपूर्वः अयं मृगविशेषः अश्व इति पशुपाठप्रकरणं स्मृत्वा अन्यान् बोधयति सः। स्वगात्रवीर्यं प्रदर्श्य निर्भीकः सः यागाश्वं बबन्ध च।

## ॥ ६. केरलीयकलारूपाणि ॥

**प्रश्ननिर्देशः १**

समुचितमुत्तरं कोष्टान्निर्धाय लिखत-

अ. हटिकथायाः उपज्ञाता कः?

(कृष्णभागवतर्, कृष्णसागरः, कृष्णगोविन्दः।)

आ. पूरक्कलि कलारूपस्य वाक्यार्थविचारः केन नाम्ना व्यह्रियते?

(मरत्तुकली, कोल्कली, मार्गकली)

इ. खलूरिका इति संस्कृतपदात् निष्पन्नं पदं किम्?

(कलरि, पूरक्कलि, चाक्यार्कूत्त्।)

ई. कलारप्पयट्ट् नाम आयोधनकलायाः प्रणेता कः इति विश्वासः।

(श्रीरामः, परशुरामः, बलरामः)

**प्रश्ननिर्देशः - २**

१. चाक्यार्कूत्त्, पाठकं इति कलारूपयोः साजात्यवैजात्यानि मञ्जुषातः चित्वा लिखत।

(क्षेत्रकला, वाद्योपकरणं नास्ति, श्लोकानां व्याख्यानं, पुराणकथा, हास्यरसः, वाद्योपकरणमस्ति, भक्तिरसः।)

**प्रश्ननिर्देशः ३**

यथोचितं योजयत।

| अ | आ |
|---|---|
| चाक्यार्कूत्त् | भक्तिभावः। |
| पाठकम् | उत्तरकेरले प्रचारमाप्ता कला। |
| पूरक्कलि | चम्पुप्रबन्धः। |
| कलरिप्पयट्ट् | सत्कथा कालक्षेपः |
| हरिकथा | आयोधनकला। |

**प्रश्ननिर्देशः - ४**

१. निर्दिष्टसूचनामनुसृत्य कलरिप्पयट्ट् इति कलारूपं अधिकृत्य टिप्पणिं लिखत।

सूचनाः आयोधनकला।

कलरिनामकं परिशीलनस्थानम्।

शास्त्रपठनम्।

खलूरिका।

प्रणेता।

अन्यकलासु स्वाधीनता।

# उत्तरसूचिका

| प्रश्ननिर्देशः १ | अङ्क |
|---|---|
| अ. कृष्णाभागवतर्। | 1 |
| आ. मरत्तुकली। | 1 |
| इ. कलरि। | 1 |
| ई. परशुरामः। | 1 |

प्रश्ननिर्देशः २

| | चाक्यार्कूत्त् | पाठकम् |
|---|---|---|
| साजात्यानि | क्षेत्रकला | क्षेत्रकला। |
| | पुराणकथा | पुराणकथा। |
| | श्लोकानां व्याख्यानम् | श्लोकानां व्याख्यानम् |
| वैजात्यानि | हास्यरसः | भक्तिरसः |
| | वाद्योपकरणं अस्ति | वाद्योपकरणं नास्ति। |

प्रश्ननिर्देशः - ३

| | |
|---|---|
| चाक्यार्कूत्त् | चम्पुप्रबन्धः। |
| पाठकम् | भक्तिभावः। |
| पूरक्कलि | उत्तरकेरले प्रचारमाप्ता कला। |
| कलरिप्पयट्ट् | खलूरिका |
| हरिकथा | सत्कथा कालक्षेपः |

प्रश्ननिर्देशः - ४

## कलरिप्पयट्ट्

केरलेषु प्रचुरं प्रचार्यमाणा आयोधनकला भवति कलरिप्पयट्ट्। आत्मरक्षार्थं एषा परिकल्पिता। एकादशे शतके चोलराजवंशैः साकं युद्धवेलायां सैनिकानां परिशीलनाय 'कलरि' नामकं परिशीलनस्थानं निर्मितमासीत्। केरलेषु प्राचीनविद्यालयाः अपि 'कलरि'

इति नाम्ना व्यवह्रियन्ते। मध्याह्नपर्यन्तं शास्त्रपठनं अनन्तरं आयोधनपरिशीलनमिति रीतिरत्र स्वीकृता आसीत्। खलूरिका इति संस्कृतपदात् एव कलरि इति पदनिष्पत्तिः।

कालीरत्तवरूपेषु कालिप्पाट्टु गानेषु कलरिकलारूपाण्यधिकृत्य सूचनाः उपलभ्यन्ते। कलरिप्पयट्टु न केवलं आयोधनप्रधानं अपि तु कलाप्रधानं च। अस्याः कलायाः प्रभावः कोल्कलि, पूरक्कलि इत्येवमादिषु कलारूपेषु अपि द्रष्टुं शक्यते। अस्याः कलायाः प्राधान्यं सर्वैरप्यङ्गीक्रियते।

## ।। ८ सुरायाः असुरता ।।

१. उदाहृतवत् मद्यपानस्य निराकरणं उद्बोधयितुं उपकारिकां भित्तिपत्रिकां रचयतु।

उदाः- "मद्यं वर्जयतु। आरोग्यं संरक्षयतु।"

२. जातकमालायाः कर्ता कः?

### उत्तरसूचिका

१. "मद्यं विषं भवति।"

"कुटुम्बं स्मर। मद्यं त्यज!!"

"मद्यं मा पिब।"

"उन्मादकवस्तूनि त्याज्यानि।"

"यतो मद्यस्ततोनाशः।"

२. आर्यशूरः।

# एककम् ६

## ।। वास्तुविद्या ।।

### ।। ८ दिशानिर्णयः ।।

I. समुचितं उत्तरं कोष्ठात् उद्धृय लिखत।

१. वास्तुविद्यायाः आधारवेदः कः?

(स्थापत्यवेदः, धनुर्वेदः, आयुर्वेदः, गान्धर्ववेदः)

२. केरलेषु वास्तुविद्याप्रतिपादकः प्रसिद्धः ग्रन्थः कः?

(मनुष्यालयचन्द्रिका, वास्तुकौमुदी, विश्वकर्म प्रकाशः, वास्तुविद्या)

३. मनुष्यालयचन्द्रिका नाम वास्तुग्रन्थस्य कर्ता कः?

(विश्वकर्मा, श्रीमङ्गलं नीलकण्ठमूसद्, पुत्रश्शेरि नीलकण्ठशर्मा, श्रीकुमारः)

४. अधुना दिशानिर्णयाय किं उपयुज्यते?

(दिशासूचकयन्त्रम्, शङ्कुः, मापिनी)

II. अधोदत्तप्रश्नानां उत्तराणि लिखत।

१. शङ्कुस्थापनं कुत्र करणीयम्?

२. पूर्वपश्चिमरेखा केन नाम्ना व्यवह्रियते?

३. यमसूत्रं नाम किम्?

४. दिशानिर्णयार्थं वृत्तरेखायां प्रथमाङ्कनं कदा करणीयम्।

५. पुरातनकाले दिशानिर्णयार्थं उपयुज्यमानानां सामग्रीणां नामानि लिखत ।

III. सूचनानुसारं प्राचीनदिशानिर्णयप्रक्रियां विशदयत।

सूचनाः-

समीकृतभूमिः ..... शङ्कुस्थापनं ........... वृत्तरचना प्राह्णान्ते प्रथमाङ्कनं ....

अपराह्णे अपि ... परेद्युः........ बिन्दुद्वययोजनं ... पूर्वपश्चिमरेखा....

ब्रह्मसूत्रं .... मत्स्यचिह्नं .... दक्षिणोत्तररेखा..... यमसूत्रं............

IV. उदाहरणानुसारं सन्धिच्छेदं कुरुत।

मातृका ....... वृक्षाश्च - वृक्षाः च। एवं चेत्

अरोगाश्च.....

V. मातृकानुसारं समस्तपदं लिखत- ।

मातृका....... अन्यत् कालं - कालान्तरं। एवं चेत्।

अन्यत् शास्त्रं -

**VI.** गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत ।

गृहनिर्माणार्थं परिगृहीतायाः भूमेः समीकरणं प्रथमं कार्यम्। ततः समीकृतभूमे मध्यदेशे शङ्कुस्थापनं करणीयम्। शङ्कुः करार्धायतः मूले अङ्गुलद्वयविस्तृतः, अग्रे एकाङ्गुलविस्तृतः, वर्तुलः, सरोजमुकुलाकाराग्रः सारदारुनिर्मितः च कल्पनीयः।

अ. गृहनिर्माणार्थं प्रथमं किं करणीयम्?

आ. शङ्कुस्थापनं कुत्र करणीयम्?

इ. शङ्कुः कथं कल्पनीयः?

ई. शङ्कुः केन निर्मितव्यम्?

उ. खण्डिकातः 'मूलं' इति पदस्य विपरीतपदं चित्वा लिखत।

**VII.** मातृभाषायां विवर्तयत।

आतपवृष्ट्यादिभ्यः आत्मानं रक्षितुं सर्वे जन्तवः स्वानुकूलं वासस्थानमिच्छन्ति। केचन जन्तवः गुहासु, केचन नीडेषु, अपरे केचन बिलादिषु च निवसन्ति। आदिममनुष्याः गुहास्ववसन्। कालान्तरे वासार्थं कुटीरगृहहर्म्यादीनि मनुष्यैः निर्मितानि।

**VIII.** सम्भाषणांशान् पूरयत ।

| | |
|---|---|
| दिनेशः | नमस्ते। ................ ? |
| महेशः | अहं ग्रन्थालयं गच्छामि। |
| दिनेशः | .................? |
| महेशः | मनुष्यालयचन्द्रिका नाम ग्रन्थस्य अन्वेषणार्थं। |
| दिनेशः | अस्य ग्रन्थस्य प्रतिपाद्यविषयः कः? |
| महेशः | ..................। |
| दिनेशः | तत् मम हस्ते अस्ति। |
| महेशः | कृपया ददातु। ...............। |

# उत्तरसूचिका

I. १. स्थापत्यवेदः

२. मनुष्यालयचन्द्रिका।

३. श्रीमंगलं नीलकण्ठमूसद्।

४. दिशासूचकयन्त्रम्।

II. १. समीकृतभूमेः मध्यदेशे शङ्कुस्थापनं करणीयम्।

२. पूर्वपश्चिमरेखा ब्रह्मसूत्रं इति नाम्ना व्यवह्रियते।

३. यमसूत्रं नाम दक्षिणोत्तररेखा भवति।

८. वृत्तरेखायां प्रथमाङ्कनं प्राह्णान्ते करणीयम्।

९. अवनम्, शङ्कुः, सूत्रं, सूची, मानदण्डः च।

III. प्रथमतया भूमेः समीकरणं करणीयम्। भूमेः मध्यदेशे शङ्कुस्थापनं करणीयम्। शङ्कुं केन्द्रीकृत्य शङ्कुदैर्घ्ययुगलसम्मितं आरं कृत्वा वृत्तं आरचयेत्। अनन्तरं प्राह्णान्ते शङ्कुच्छाया वृत्तरेखायां यत्र पतति तत्र अङ्कनं कुर्यात्। एवं अपराह्ने अपि। परेद्युः अपि एवं कुर्यात्। ततः प्राह्णान्तयोः अङ्कनद्वयोः मध्यगतो भागो त्रिधा विभज्य यः भागः प्रथमदिनप्राह्णान्तबिन्दोः समीपमागच्छति तं बिन्दुम् अपराह्णाङ्कितबिन्दुना सह योजयित्वा ब्रह्मसूत्रं निर्णीयात्। ततः पूर्वपश्चिमरेखायाम् एकैकं बिन्दुं आधारीकृत्य अन्योन्यान्तर्गतं वृत्तम् आरचयेत्। वृत्तसङ्गमेन मत्स्यचिह्नं जायते। मत्स्यचिह्नस्य मुखं पुच्छं च योजयित्वा यमसूत्रस्य निर्णयं कुर्यात्।

IV. अरोगाः च।

V. शास्त्रान्तरम्।

VI. अ. भूमेः समीकरणम्।

आ. समीकृतभूमेः मध्यदेशे।

इ. शङ्कुः करार्धायतः, मूले अङ्गुलद्वयविस्तृतः अग्रे एकाङ्गुलविस्तृतः, वर्तुलः, सरोजमुकुलाकाराग्रः, सारदारुनिर्मितश्च कल्पनीयः।

ई. सारदारुणा

उ. मूले X अग्रे

VII. വെയിൽ, മഴ ഇവകളിൽ നിന്ന് സ്വയം രക്ഷയ്ക്ക് വേണ്ടി എല്ലാ ജന്തുക്കളും അവനവന് അനുകൂലമായ വാസസ്ഥാനം ആഗ്രഹിക്കുന്നു. ചില ജന്തുക്കൾ ഗുഹകളിലും, ചിലവ കൂടുകളിലും, മറ്റുചിലവ ഗൃഹാദികളിലും വസിക്കുന്നു. ആദിമമനുഷ്യർ ഗുഹകളിലാണ് വസിച്ചിരുന്നത്. കാലക്രമേണ വസിക്കുന്നതിനുവേണ്ടി കുടിൽ, വീട്, കൊട്ടാരം തുടങ്ങിയവ മനുഷ്യരാൽ നിർമ്മിക്കപ്പെട്ടു.

VIII. दिनेशः — नमस्ते। त्वं कुत्र गच्छसि?

महेशः — अहं ग्रन्थालयं गच्छामि।

दिनेशः — किमर्थम्?

महेशः — मनुष्यालयचन्द्रिका नाम ग्रन्थस्य अन्वेषणार्थं।

दिनेशः — अस्य ग्रन्थस्य प्रतिपाद्यविषयः कः?

महेशः — वास्तुविद्या।

दिनेशः — तत् मम हस्ते अस्ति।

महेशः — कृपया ददातु। धन्यवादः।

## एककं ७

## ।। मानवधर्मः ।

## ।। १० योगिनः सर्वसेवकाः ।।

प्रवर्तनं १ जीवचरितं

| | | |
|---|---|---|
| नाम | - | तपोवनस्वामी। |
| जननस्थलं | - | पालक्काट् मुङ्प्पल्लूर्। |
| पूर्वाश्रमनाम | - | सुब्रह्मण्यः, (चिप्पुकुट्टि)। |

| | | |
|---|---|---|
| वैयत्तिक विशेषाः | - | सन्यासदीक्षा स्वीकृतः, सहृदयः, कलारसिकः।<br>व्याकरणादि शास्त्रेषु निष्णातः। |
| रचनाः | - | विभाकरः, विष्णुयमकं।<br>कैलासयात्रा, हिमगिरिविहारः , बदरीस्त्रोत्रं।<br>चिन्मयानन्दस्यगुरुः। |
| आदर्शः | - | आत्मक्रीडारताः अपि समाजसेवकाः। |

**प्रवर्तननं २**

समाजसेवामधिकृत्य लघुटिप्पणिं लिखत।

## उत्तरसूचिका

प्रवर्तनं १

महात्मा तपोवनस्वामी पालक्काट् मुटप्पल्लूर ग्रामे जनिम् अलभत। पूर्वाश्रमे सुब्रह्मण्यः इति पितृभ्यां कृतनामधेयः चिप्पुक्कुट्टि नाम्ना सर्वैराहूतः। सन्यासदीक्षास्वीकारानन्तरं तपोवनस्वामी इति दीक्षानाम्ना प्रसिद्धोऽभवत्। सहृदयः, कलारसिकः, अधीतव्याकरणादिशास्त्रः, स्निग्धचित्तः युवा सुब्रह्मण्यः विभाकराख्यं किमपि खण्डकाव्यं विरचयामास। विष्णुयमकं, कैलासयात्रा, हिमगिरिविहारः, बदरीस्तोत्रं इत्यादयः प्रशस्ताः ग्रन्थाः अपि तेन विरचिता उपलभ्यन्ते। विश्वविश्रुतायाः चिन्मयामिशन् इत्याख्यायाः संस्थायाः स्थापकस्य सन्यासिश्रेष्ठस्य स्वामिनः चिन्मयानन्दस्य अयं गुरुः। अस्मिन् दुःखाग्निसन्तप्ते संसारे आत्मशान्तिरेव महान् सुरनदीह्रदः। अतः सन्यासिनः आत्मक्रीडारताः अपि समाजसेवकाः भवन्ति इति तस्य आदर्शः।

**प्रवर्तननं २**

*मातृका-*

समाजसेवामधिकृत्य लघुविवरणम्

अतिवृष्ट्या जातस्य जलोपप्लवस्य अन्ते विद्यालयः समारब्धः। किन्तु दिनद्वयानन्तरमपि रामुः विद्यालयं न आगच्छत्। कक्ष्यायां रामुः एवं पठने अग्रगण्यः आसीत्। सुहृदः तम्

अन्विष्य तस्य गृहम् अगच्छत्। तदा ज्ञातवन्तः तस्य गृहं जलोपप्लवेन विलीनम् इति। सर्वेऽपि दुःखिता अभवन्। तस्य सर्वाणि पुस्तकानि, वस्त्राणि वस्तूनि च विनष्टानि इति च ज्ञातवन्तः। तस्य मित्राणि एकत्र मिलित्वा निश्चयमकुर्वन्, यत् यथाशक्ति तस्य साहाय्यं कर्तव्यमिति। अध्यापिकायाः अनुमत्या ते रामस्यगृहस्य पुनरुद्धारणम् अकुर्वन्। पाठपुस्तकानि वस्त्राणि च समाहृत्य तस्मै अयच्छन्। एवं मित्राणां साहाय्येन रामुः यथापूर्वं ससन्तोषं विद्यालयं आगत्य अध्ययनम् अन्ववर्तत।

## ।। ११ दीक्षान्तोपदेशः ।।

१. किं नाम वेदान्तः?

२. स्वामिनः तपोवनाचार्यस्य जीवनचरितं भवति .............।

३. दशोपनिषदन्तर्गतानां चत्वारि उपनिषदां नामानि लिखत।

४. आरोग्यविश्वविद्यालये प्रचालितं दीक्षान्तसमारोहमधिकृत्य वर्तमानपत्रिकायाः कृते एकं विवरणं सूचनामनुसृत्य लिखत।

सूचनाः

| | | |
|---|---|---|
| प्रार्थना | : | छात्राः |
| स्वागतम् | : | कुलसचिवः |
| अध्यक्षः | : | कुलपतिः |
| दिक्षान्तसमारोहभाषणम् | : | कुलाधिपतिः |
| बिरुददाता | : | सङ्कायाध्यक्षः |
| प्रतिज्ञा | | |
| आशंसाः | : | रक्षाकर्तृसमित्यध्यक्षः |
| | : | अध्यापकप्रतिनिधिः |
| | : | छात्रप्रतिनिधिः |
| बिरुदस्वीकर्तारः | : | २५ छात्राः |
| धन्यवादः | : | अध्यापकप्रतिनिधिः |

# उत्तरसूचिका

१. वेदस्य अन्तिमावयवः उपनिषद् वेदान्त इत्यपि उच्यन्ते।

२. ईश्वरदर्शनम् अथवा तपोवनचरितम्।

३. ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य, तैत्तिरीय, ऐतरेय, छान्दोग्य, बृहदारण्यकानि दशोपनिषदः।

४. पञ्चविंशतिः भिषजः सेवनाय सज्जाः।

तृश्शिवपुरम् आरोग्यविश्वविद्यालयात् पञ्चविंशति छात्राः स्ववैद्यपठनं समाप्य सेवामार्गं प्रविष्टाः। स्वस्य वैद्यवृत्तिः समाजस्य कल्याणाय, दुर्बलानां सान्त्वनाय च उपयुज्यतेति ते प्रतिज्ञां चक्रुः। कुलाधिपतिः वैद्यवृत्तेः महत्वं सामान्यजनतायाः विशिष्य ग्रामीणजनतायाः स्वास्थ्यसंरक्षणे युवभिषजां प्रतिबद्धतां चाधिकृत्य स्वप्रभाषणे सूचयामास।

आगस्तमासस्य दशमे दिने बुधवासरे प्रातः दशवादने एव छात्राणां प्रार्थनया सह कार्यक्रमः प्रारब्धः। कुलसचिवः स्वागतं व्याजहार। विश्वविद्यालयस्य कुलपतिः आध्यक्षं अवहत्। कुलाधिपतेः दीक्षान्तसमारोहभाषणानन्तरं सङ्कायाध्यक्षः छात्रेभ्यः बिरुदम् अयच्छत्। बिरुदं स्वीकृतवन्तः भिषजः प्रतिज्ञाम् अकुर्वन्। रक्षाकर्तृसमित्यध्यक्षः, अध्यापकप्रतिनिधिः, छात्रप्रतिनिधिः च आशीर्वचांसि प्रसार्य भाषितवन्तः। आहत्य पञ्चविंशतिः छात्राः वैद्यवृत्तिं प्रारभन्त। अध्यापकप्रतिनिधिः कार्यक्रमे धन्यवादं प्रकाशयामास।

अपूर्वः कोऽपि कोशोऽयं
विद्यते तव भारति।
व्ययतो वृद्धिमायाति
क्षयमायाति सञ्चयात्।।

उद्यमः साहसं धैर्यं
बुद्धिः शक्तिः पराक्रमः
षडेते यत्र वर्तन्ते
तत्र देवः सहायकृत्।।

विद्याददाति विनयं
विनयाद्याति पात्रताम्।
पात्रत्वात् धनमाप्नोति
धनाद्धर्मः ततः सुखम्।।